"इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभर्त्ते ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
सन्तप्ते भृशमरतिं हि सद्वियोगः ॥")
सार्व्वभौमः । ( यथा, रामायणे ।२।८२।१४।
"प्रयाणमिति च श्रुत्वा राजराजस्य योषितः ।
हित्वा यानानि यानार्हा ब्राह्मणं पर्य्यवारयन् ॥")
सुधाकरः । इति मेदिनी । जे, ३६ ॥

राजरीतिः, स्त्री, पित्तलविशेषः । तत्पर्य्यायः । पाकतुण्डी २ राजपुत्त्री ३ महेश्वरी ४ ब्रह्माणी ५ ब्रह्मरीतिः ६ कपिला ७ पिङ्गला ८ । अस्य गुणाः । तिक्तत्वम् । शीतलत्वम् । लवणत्वम् । शोधनत्वम् । पाण्डुवातक्रिमिप्लीहपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

राजर्षिः, पुं, ( राजा ऋषिरिव श्रेष्ठत्वात् । ) ऋतुपर्णादिराजः । इति त्रिकाण्डशेषः ॥ तस्य स्मरणं कलिनाशनम् । यथा,—
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम् ॥"
इति महाभारतम् ॥

राजलक्ष्मा, [ न् ] पुं, (राज्ञो लक्ष्म चिह्नं यस्य ।) युधिष्ठिरः । इति धनञ्जयकोषः ॥ ( राजचिह्नयुक्ते, त्रि । )

राजलक्ष्मीः, स्त्री, ( राज्ञो लक्ष्मीः । ) राजश्रीः । यथा, ज्योतिषतत्त्वे ।
"मन्त्रप्रभावनिपुणः प्रमदाविलासः
श्वेतातपत्रनृपपूजितदेशलाभः ।
हस्त्यश्वलाभधनपूर्णमनोरथः स्यात्
शौक्री दशा भवति निश्चलराजलक्ष्मीः ॥"

राजवंश्यः, त्रि, ( राजवंशे भवः । राजवंश+यत् । ) राजवंशोद्भवः । तत्पर्य्यायः । राजबीजी २ । इत्यमरः । २ । ७ । २ ॥

राजवर्त्म, [ न् ] क्ली, (राज्ञो वर्त्म पन्थाः ।) राजपथः । तत्पर्य्यायः । घण्टापथः २ संसरणम् ३ श्रीपथः ४ उपनिष्क्रमणम् ५ उपनिष्करम् ६ महापथः ७ । इति हेमचन्द्रः । ४ । ५३ ॥

राजवला, स्त्री, ( राजते शोभते इति । राज+अच् । राजा वला इति कर्म्मधारयः । ) भद्रवला । इत्यमरः । २ । ४ । ११३ ॥ गन्धभादालिया इति भाषा ॥

राजवल्लभः, पुं, ( राज्ञां वल्लभः । ) राजादनी । राजाम्रः । राजवदरः । इति राजनिर्घण्टः ॥ नारायणदासकविराजकृतद्रव्यगुणग्रन्थविशेषः । यथा —
"श्रीनारायणदासेन कविराजेन धीमता ।
प्रतिसंस्क्रियते द्रव्यगुणोऽयं राजवल्लभः ॥"
इति तस्य द्वितीयश्लोकः ॥
नृपप्रिये, त्रि । ( यथा, मार्कण्डेये । ४६ । ४६ ।
"दुरधायी विना चैचैः परभूमिचरी वली ।
ग्राम एवाक्रमीसंज्ञो राजवल्लभसंश्रयः ॥")

राजवल्ली, स्त्री, ( राजप्रिया वल्ली । ) तोयवल्ली । इति रत्नमाला । उच्छा इति भाषा ।

राजवान्, [ त् ] त्रि, ( राजाऽस्यस्येति । राजन्+मतुप् । मस्य वः । ) राजमात्रयुक्तदेशः । यथा,—
"सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्र राजवान् ॥"
इत्यमरः । २ । १ । १३ ॥
( नृपविशिष्टः । यथा, महाभारते ।५।१.७।
"इयम् सा राजवती सन्दृश्या
ग्रहैरिव द्यौर्विमलैरुपेता ॥")

राजवाहः, पुं, (राजानं वहतीति । वह+अण् ।) घोटकः । इति शब्दचन्द्रिका ॥

राजवाह्यः, पुं, ( राज्ञां वाह्यः । ) राजवाहकहस्ती । तत्पर्य्यायः । उपवाह्यः २ । इति हेमचन्द्रः ॥ विजयकुञ्जरः ३ । इति त्रिकाण्डशेषः ॥ राज्ञ वहनीये, त्रि ॥

राजवृक्षः, पुं, (वृक्षाणां राजा । राजदन्तादित्वात् परनिपातः । ) आरग्वधवृक्षः । इत्यमरः ॥ पियालवृक्षः । इति मेदिनी ॥ लङ्कास्थायी वृक्षः । इति शब्दचन्द्रिका ॥ लङ्कासिज् इति भाषा ॥

राजशयः, पुं, ( राजः शोभमानः शयः । ) पट्टः । इति शब्दमाला ॥ पाट् इति भाषा ॥

राजशफरः, पुं, इल्लिशमत्स्यः । इति हारावली ॥

राजशय्या, स्त्री, ( राज्ञः शय्या । ) राज्ञः शयनीयम् । तत्पर्य्यायः । महाशय्या २ । इति हेमचन्द्रः ॥

राजशाकः, पुं, ( राजप्रियः शाकः । शाकानां राजा इति वा । ) वास्तूकम् । इति राजनिर्घण्टः ॥

राजशुकः, पुं, (शुकानां राजा । राजदन्तादित्वात् परनिपातः । ) पक्षिविशेषः । राजा सुगा इति हिन्दी भाषा । तत्पर्य्यायः । प्राशः २ घृतपत्रः ३ नृपप्रियः ४ । इति राजनिर्घण्टः ॥

राजशृङ्गं, क्ली, राजच्छत्रम् । तत्पर्य्यायः । कनकदण्डकम् २ । इति त्रिकाण्डशेषः ॥

राजशृङ्गः, पुं, मद्गुरमत्स्यः । इति हेमचन्द्रः ॥

राजसः, त्रि, ( रजसो भवः । रजस्+अण् । ) रजोगुणोद्भवः । तल्लक्षणं यथा,—
"आरम्भरुचिताधैर्य्यमसत्कार्य्यपरिग्रहः ।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ॥"
आरम्भरुचिता फलार्थं कर्म्मानुष्ठानशीलता ॥*॥
संक्षेपतस्तल्लक्षणं यथा,—
"येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति पुष्कलाम् ।
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम् ॥"
तस्माद्गतिर्यथा,—
"देवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसाः ।
तिर्य्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥"
तद्गतिप्रकारा यथा,—
"भक्ता मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः ।
द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ॥
राजानः क्षत्त्रियाश्चैव राज्ञाञ्चैव पुरोहिताः ।
वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ॥
गन्धर्व्वा गुह्यका यक्षा विबुधानुचराश्च ये ।
तथैवाप्सरसः सर्व्वा राजसीषूत्तमा गतिः ॥"
इति वामने १२ अध्यायः ॥
राजसाहारा यथा,—
"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥"
राजसयज्ञो यथा,—
"अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥"
राजसतपो यथा,—
"सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥"*॥
राजसदानं यथा,—
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥"
इति श्रीभगवद्गीतायाम् १७ अध्यायः ॥
राजसत्यागो यथा,—
"दुःखमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥"
राजसज्ञानं यथा,—
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥"
राजसकर्म्म यथा,—
"यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥"*॥
राजसकर्त्ता यथा,—
"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः ॥"
राजसी बुद्धिर्यथा,—
"यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ॥"
राजसी धृतिर्यथा,—
"यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्ज्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥"
राजससुखं यथा,—
"विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुखं राजसं स्मृतम् ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥ * ॥
राजसपुराणानि यथा,—
"ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत ॥"
राजसस्मृतयो यथा,—
"आवर्त्तं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च ।
कात्यायनं वैष्णवञ्च राजसाः स्वर्गदा मताः ॥"
इति पाद्मोत्तरखण्डे ४३ अध्यायः ॥

राजसदनं, क्ली, ( राज्ञः सदनम् । ) राजगृहम् । तत्पर्य्यायः । सौधः २ । इत्यमरः । २ । २ । १० ॥ भूपालभवनम् ३ सुधामयम् ४ । इति शब्दरत्नावली ॥ तद्भेदा यथा,—
"सौधोऽस्त्री राजसदनमुपकार्य्योपकारिका ।